॥ अथ श्रीमद्देवीभागवत माहात्म्यं प्रारभ्यते ॥

इदं ४ शक १८६७ तमारिप्रस्ताब्दिक २५ तम राजेन्द्रमतुलारोप राजनदसिनिवेदितम् ।

श्रीगणेशोविजयते ॥ सृष्टौयासर्गरूपाजगदवनविधौपालिनीयाचरौद्रीसंहारेचापियस्याजगदिदमखिलंक्रीडनंयापराख्या ॥ पश्यन्ती[illegible]

वैखरीवर्णरूपासास्मद्वाचं प्रसन्नाविधिहरिगिरिशाराधितालंकरोतु ॥१॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमम् ॥ [illegible]दनुभगवती

 ऋषयऊचुः सूतजीवसमाःवह्वीर्य्यस्त्वंश्रावयसीहनः ॥ कथामनोहराःपुण्याव्यासशिष्यमहामते ॥३॥ देवींसरस्वतींव्यासंततोजयमुदीरयेत् ॥२॥

पेतमस्माभिर्भक्तितःश्रुतम् ॥ ४ ॥ शिवस्य[illegible]रितंदिव्यंभस्मरुद्राक्षयोस्तथा ॥ सेतिहासंचमाहात्म्यंश्रुतंतवमुखाम्बुजात् ॥ ५ ॥ सर्वपापहरंपुण्यंविष्णोश्चरितमद्भुतम् ॥ अवतारकथो

पावनात्पावनम्परम् ॥ भुक्तिमुक्तिप्रदं[illegible]मनायासेनसर्वशः ॥६॥ तत्त्वंब्रूहिमहाभागयेनसिद्ध्यन्तिमानवाः ॥ अधुनाश्रोतुमिच्छामः

[illegible]नांहितकाम्यया ॥ सर्वशास्त्रस्ययत्सारंतद्वोवक्ष्याम्यशेषतः ॥ ८ ॥ कलावपिपरंत्वत्तोन[illegible]विघ्नःसंशयच्छिदम् ॥७॥

सूतउवाच ॥ साधुपृष्टंमहाभाग[illegible] तावत्पापाटवीनृणांक्लेशदाऽदभ्रकण्टका ॥यावन्नपरशुःप्राप्तोदेवीभागवताभिधः ॥१०॥ तावद्गर्जन्तितीर्थानि[illegible]निव्रतानिच ॥ यावन्न

श्रूयतेसम्यग्देवीभागवतंनरैः[illegible]ष्णगुः ॥ ११ ॥ ऋषयऊचुः ॥ सूतसूतमहाभागवदनोवदतांवर ॥ तावत्क्लेशावहानृणामुपसर्गमहातमः ॥

यावन्नैवोदयंप्राप्तोदेवर्षिकिंचपूजनम् ॥ कैर्म्मानवैःश्रुतंपूर्वंकान्कान्कामानवाप्नुयुः ॥ १३ ॥ कीदृशंतत्पुराणंहिविधिरु[illegible]दकः ॥

कतिभिर्वासरैः[illegible]ष्यानध्यापयत्पुरा ॥ १४ ॥ सूतउवाच ॥ विष्णोरंशोमुनिर्ज्ञ[illegible]

विभज्यवेदांस्तभगवान्बादरायणः ॥ व्रात्यानांद्विजवन्धूनांवेदेष्वनाधिकारिणाम् ॥ स्त्रीणांदुर्मेधसान्नृणांधर्म[illegible]

विचार्य्यैवमेवच ॥ १७ ॥ पुराणसंहितादध्यौतेषांधर्मविधित्सया ॥ १६ ॥ अष्टादशपुराणानि[illegible]

[illegible]शुद्ध[illegible] देवीभागवतंतत्रपुराणंभोगमोक्षदम् ॥ स्वयंतुश्रावयामासजनमेजयभूपति[illegible]

भा[illegible]ह्यसंशुद्ध्यैराज्ञाभागवतंश्रुतम् ॥ १९ ॥ नवभिर्दिवसैःश्रीमद्वेदव्यासमुखाम्बुजात्[illegible]

[illegible]यज्ञे[illegible]शम् ॥ वसुदे[illegible]र्भूपतिः ॥ दिव्यरूपधरोदेव्यास्सालोक्यंतत्क्ष[illegible]दगात् ॥ २[illegible]

[illegible]च्चर्यपरांमुद[illegible]वान्देवर्षिर[illegible] ॥ २२ ॥ अष्टादशपुराणानांमध्येसर्वोत्तमंपरम् ॥ देवीभागवतंनाम[illegible]

[illegible]व्याभागवतींकथां[illegible] ॥ तेषांसिद्धिर्नदूरस्थातस्मात्सेव्यासदानृभिः ॥ २४ ॥ दिनमर्द्धंतदर्द्धं[illegible]

चित् ॥ २६ ॥ सर्वयज्ञेषुतीर्थेषुसर्वदानेषुयत्फलम् ॥ सकृत्पुराणश्रवणात्तत्फलंलभतेनरः [illegible]

श्रवणादन्योविद्यतेनापरोनृणाम् ॥ २७ ॥ धर्म्माचारविहीना[illegible]नृणाम् ॥

वनरःस्यादजरामरः ॥ देव्याःकथामृतंकुर्य्यात्कुलमेवा...रमर...
॥ ३० ॥ आश्विनेमधुमासेवातपोमासेशुचौतथा ॥ चतुर्षुनवरात्रेषुविशेषात्फलदायक
फलाधिकप्रदानेनप्रोक्तःपुण्यप्रदोनृणाम् ॥ ३२ ॥ येदुर्हृदःपापरताविमूढामित्रद्रुहोवेदविनिंद
॥ ३३ ॥ परस्व...हरणेतिलुब्धायेवैनराःकल्मषभारभाजः ॥ गोदेवताब्राह्म...क्तिहीनानव
रनेकैर्नियमैर्म... ३२ ...फलंनलभ्यतेनवाहयज्ञेनतदाप्यतेनृणाम् ॥ ३६ ॥ तथ
चोवदरीतीर्थमगमंतः ॥ ...विप्राः ॥ ३६ ॥ अतोभागवतंदेव्याःपुराणंपरतःपरम् ॥ धर्म्मार्थक
नस्यतिथि... ॥ पत्राशगतेरवौ ॥ महाष्टम्यांसमभ्यर्च्यहेमसिंहासनस्थितम् ॥ ३८ ॥ देवीप्रीतिप्रद
योग्यायसदेव्याःपदवीलभेत् ॥ ३९ ॥ देवीभागवतस्यापिश्लोकंश्लोकार्द्धमेववा ॥ भक्त्यायश्चपठेन्नित्यंसदेव्याः... ...त्वाभिपूज्यच ॥ नि
महामारीसमुद्भवम् ॥ उत्पातानाखिलांश्चापिहंतिश्रवणमात्रतः ॥ ४१ ॥ बालग्रहकृतंयच्चभूतप्रेतकृतंभयम् ॥ देवीभागवत
॥ ४२ ॥ यस्तुभागवतंदेव्याःपठेद्भक्त्याशृणोतिवा ॥ धर्ममर्थंचकामंचमोक्षंचलभतेनरः ॥ ४३ ॥ श्रवणाद्वसुदेवोस्यप्रसेनान्वे
प्रियंपुत्रंकृष्णंलब्ध्वासुमोदह ॥४४॥ यएतांशृणुयाद्भक्त्याश्रीमद्भागवतींकथाम् ॥ भुक्तिमुक्तिसलभतेभक्त्यायश्चपठेदिमाम् ॥ ४५ ॥ अपुत्रोलभतेपुत्रन्दार
द्रोधनवान्भवेत् ॥ रोगीरोगात्प्रमुच्येतश्रुत्वाभागवतामृतम् ॥ ४६ ॥ वंध्यावाकाकवंध्यावामृतवत्साचयांगना ॥ देवीभागवतंश्रुत्वालभेत्पुत्रंचिरायुषम्
॥ ४७ ॥ पूजितंयद्गृहेनित्यंश्रीभागवतपुस्तकम् ॥ तद्गृहंतीर्थभूतंहिवसतांपापनाशकम् ॥४८॥ अष्टम्यांवाचतुर्दश्यांनवम्यांभक्तिसंयुतः ॥ यःपठेच्छृणुया
द्वापिससिद्धिंलभतेपराम् ॥ ४९ ॥ पठन्द्विजोवेदविदग्रणीर्भवेद्बाहुप्रजातोधरणीपतिःस्यात् ॥ वैश्यःपठन्वित्तसमृद्धिमेतिशूद्रोपिशृण्वन्स्वकुलोत्तम
स्स्यात् ॥ ५० ॥ ॥ इतिश्रीस्कन्दपुराणेमानसखण्डेदेवीभागवतमाहात्म्येप्रथमोऽध्यायः ॥ १ ॥ ऋषयऊचुः ॥ ॥ वसुदेवोमहाभागःकथंपुत्र
मवाप्तवान् ॥ प्रसेनःकुत्रकृष्णेनभ्रमतान्वेषितःकथम् ॥ १ ॥ विधिनाकेनकस्माच्चदेवीभागवतंश्रुतम् ॥ वसुदेवेनसुमतेवदसूतकथामिमाम् ॥ २ ॥
॥ सूतउवाच ॥ सत्राजिद्भोजवंशीयोद्वारवत्यांसुखंवसन् ॥ सूर्य्यस्याराधनेयत्तोभक्तश्चपरमस्सखा ॥ ३ ॥ अथकालेनकियताप्रसन्नस्सविताभ
वत् ॥ स्वलोकंदर्शयामासतद्भक्त्याप्रणयेनच ॥ ४ ॥ पुनः ॥ तस्मैप्रीतश्चभगवान्स्यमंतकमणिंददौ ॥ सतंबिभ्रन्मणिंकण्ठेद्वारकामाजगामह ॥ ५ ॥

दृष्ट्वातंतेजसाक्रांतामत्वादित्यंपुरौकसः ॥ कृष्णमूचुस्समभ्येत्यसुधर्म्मायामवस्थितम् ॥ ६ ॥ एषआयातिसविता दिदृक्षुस्त्वांजगत्पते ॥ श्रुत्वाकृष्णस्तु
तद्वाचंप्रहस्योवाचसंसदि ॥ ७ ॥ सवितानैषभोवाला ःसत्राजिन्मणिनाज्वलन् ॥ स्यमन्तकेनचायातिभास्वद्दत्तेनभास्वता ॥ ८ ॥ अथविप्रान्समाहूय
स्वास्तिवाचनपूर्वकम् ॥ प्रावेशयत्समभ्यर्च्यसत्राजित्स्वगृहेमणिम् ॥ ९ ॥ नतत्रमारीदुर्भिक्षंनोपसर्गभयंक्वचित् ॥ यत्रास्तेसमणिर्नित्यमष्टभारसुवर्णदः
॥ १० ॥ अथसत्राजितोभ्राताप्रसेनोनामकर्हिचित् ॥ कण्ठेबध्वामणिंसद्योहयमारुह्यसैंधवम् ॥ ११ ॥ मृगयार्थंवनंयातस्तमद्राक्षीन्मृगाधिपः ॥ प्रसेनंसहयंहं
त्वासिंहोजग्राहतंमणिम् ॥ १२ ॥ जाम्ववान्ऋक्षराजोथदृष्ट्वामणिधरंहरिम् ॥ हत्वाचतंबिलद्वारिमणिंजग्राहवीर्य्यवान् ॥ १३ ॥ सतंमणिंस्वपुत्रायक्रीड
नार्थमदात्प्रभुः ॥ अथचिक्रीडवालोपिमणिं तंप्राप्यभास्वरम् ॥ १४॥ प्रसेनेऽनागतेचाथसत्राजित्पर्य्यतप्यत ॥ नजानेकेननिहतःप्रसेनोमणिमिच्छता॥१५॥
अथलोकमुखोद्गीर्णाकिंवदन्तीपुरेभवत् ॥ कृष्णेननिहतोनूनंप्रसेनोमाणिलिप्सुना ॥१६॥ सतंशुश्रावकृष्णोपिदुर्य्यशोलिप्तमात्मनि॥ मार्ष्टुंतत्तस्यपदवींपुरौ
कोभिस्सहागमत् ॥ १७ ॥ गत्वासविपिनेपश्यत्प्रसेनंहरिणाहतम् ॥ ययौमृगेन्द्रमन्विष्यन्नसृग्बिंदंकिताध्वना ॥ १८ ॥ अथकृष्णोहतंसिंहंबिलद्वारि
विलोक्यच ॥ उवाचभगवान्वाचंकृपयापुरवासिनः ॥ १९ ॥ तिष्ठध्वंयूयमत्रैवयावदागमनंमम ॥ प्रविशामिबिलंत्वेतन्मणिह कलध्ये ॥ २० ॥
तथेत्युक्त्वातुतेतस्थुस्तत्रैवद्वारकौकसः॥ जगामांतर्बिलंकृष्णोयत्रजाम्बवतोगृहम्॥२१॥ऋक्षराजसुतंदृष्ट्वाकृष्णोमणिधरंतदा ॥ ह [illegible] चु
क्रोशभीतवत् ॥२२॥ श्रुत्वाधात्रीरवंसद्यःसमागत्यर्क्षराट्तदा ॥ युयुधेस्वामिनासाकमविश्रममहर्निशम् ॥२३॥ एवंत्रिनवरात्रं [illegible] ॥
गमंप्रतीक्षतेस्त [illegible] पुरौकसः ॥२४॥ द्वादशाहंततोभीत्याप्रतिजग्मुर्निजालयम्॥ तत्रतेकथयामासुर्वृत्तांतंसर्व [illegible] दितः ॥२५॥ सत्राजितंशपंतस्तेसर्वेशो
काकुला [illegible] महाभागःश्रुत्वापुत्रस्यतांकथाम् ॥ २६ ॥ मुमोहसपरीवारस्तदापरमयाशुचा [illegible] यामासबहुधाकथंश्रेयोभवेन्मम ॥ २७ ॥
अथाजगामभग [illegible] लोकतः ॥ उत्थायतंप्रणम्यासौवसुदेवोभ्यपूजयत् ॥ २८ ॥ नारदोनामयंपृष्ट्वावसुदेवंमहामतिम् ॥ पप्रच्छचयदुश्रेष्ठंकिंचिंतय
सितद्वद ॥ २९ ॥ वसुदेवउवाच ॥ पुत्रोमेऽतिप्रियःकृष्णःप्रसेनान्वेषणायतु ॥ पौरैस्साकंवनंगत्वानिहतंतंतदैक्षत ॥ ३० ॥ प्रसेनघातकंदृष्ट्वाबिलद्वारेमृतं
हरिम् ॥ द्वारिपौरानधिष्ठाप्यबिलांतर्गतवान्स्वयम् ॥ ३१ ॥ बहवोदिवसायातानायात्यद्यापिमेसुतः ॥ अतश्शोचामितद्धेतोरयेनलप्स्येसुतंमुने ॥३२॥ ना [illegible]
उवाच ॥ पुत्रप्राप्त्यैयदुश्रेष्ठदेवीमाराधयांबिकाम्॥ तस्याआराधनेनैवसद्यःश्रेयोह्यवाप्स्यसि ॥३३॥ वसुदेवउवाच ॥ भगवन्काहिसादेवीकिंप्रभावा [illegible] ॥ ३५ ॥ या
कथमाराधनंतस्याद्देवर्षेकृपयावद ॥ ३४ ॥ नारदउवाच ॥ वसुदेवमहाभागशृणु [illegible] नोमम ॥ देव्यामाहात्म्यमतुलंकोवक्तुंविस्तरात्क्षमः ॥ ३६ ॥

साभगवतीनित्यासच्चिदानन्दरूपिणी ॥ परात्परतरादेवीययाव्यातमिदंजगत् ॥ ३६ ॥ यदारा[illegible]नतोब्रह्मासृजतीदंचराचरम् ॥ यांचस्तुत्वाविष्णुर्मुक्त[illegible]
कैटभजाद्भयात् ॥ ३७ ॥ विष्णुर्यत्कृपयाविश्वंबिभर्तिभगवानिदम् ॥ रुद्रस्संहरतेयस्याःकृपापांगनिरीक्षणात् ॥ ३८ ॥ संसारबंधहेतुर्य्यासै[illegible]
यिनी ॥ साविद्यापरमादेवीसैवसर्वेश्वरेश्वरी ॥ ३९ ॥ नवरात्रविधानेनसम्पूज्यजगदंबिकाम् ॥ नवाहोभिःपुराणंचदेव्याभागवतंशृणु ॥ ४० ॥ यस्य[illegible]
मात्रेणसद्यःपुत्रमवाप्स्यसि ॥ भुक्तिर्मुक्तिर्नदूरस्थापठतांशृण्वतांनृणाम् ॥ ४१ ॥ इत्युक्तोनारदेनासौवसुदेवःप्रणम्यतम् ॥ उवाचपरयाप्रीत्यानारदंमुनिस
त्तमम् ॥ ४२ ॥ वसुदेवउवाच ॥ भगवंस्तववाक्येनसंस्मृतंवृत्तमात्मनः ॥ श्रूयतांतच्चवक्ष्यामिदेवीमाहात्म्यसंभवम् ॥ ४३ ॥ पुरानभोगिराकंसोदेव
क्यष्टमगर्भतः ॥ ज्ञात्वात्ममृत्युंपापोमांसभार्य्यंन्यरुणद्ध्रिया ॥ ४४ ॥ कारागारेहमवसंदेवक्यासहभार्य्य[illegible] जातंजातंसमवधीत्पुत्रंकंसोपिपापकृत् ॥
॥ ४५ ॥ षट्पुत्रानिहतास्तेनतदाशोकाकुलाभृशम् ॥ अतप्यद्देवकीदेवीनक्तंदिवमनिन्दिता ॥ ४६ ॥ तदाहंगर्ग[illegible]हूयमुनिंनत्वाभिपज्यच ॥ निवेद्यदेवकी
दुःखमवोचंपुत्रकाम्यया ॥ ४७ ॥ भगवन्करुणासिन्धोयादवानांगुरुर्भवान् ॥ आयुष्मत्पुत्रसंप्राप्तिसाधनंवदमेमुने ॥ ४८ ॥ [illegible]च
दयानिधिः ॥ वसुदेवमहाभागशृणुतत्साधनम्परम् ॥ ४९ ॥ यासाभगवतीदुर्गाभक्तदुर्गतिहारिणी ॥ तामाराधयकल्याणींसद्यःश्र[illegible]तदरत ॥
यदाराधनतस्सर्वेसर्वान्कामानवाप्नुयुः ॥ नकिंचिद्दुर्लभंलोकेदुर्गार्चनवतांनृणाम् ॥ ५१ ॥ इत्युक्तोहंमुदायुक्तःसभार्य्योमुनिपुंगवम् ॥ प्रणम्यपरयाभक्त्या
प्रावोचंविहितांजलिः ॥ ५२ ॥ वसुदेवउवाच ॥ यद्यस्तिभगवन्प्रीतिर्मयितेकरुणानिधे ॥ तदागुरोमदर्थेत्वंसमाराधयचण्डिकाम् ॥ ५३ ॥ निरुद्धःकंस
गेहेहंनाकिंचित्कर्त्तुमुत्सहे ॥ अतस्त्वमेवदुःखाब्धेर्मामुद्धरमहामते ॥ ५४ ॥ इत्युक्तस्तुमयाप्रीतःप्रोवाचमुनिपुंगवः ॥ वसुदेवतवप्रीत्याकरिष्यामिहितंतव
॥ ५५ ॥ अथगर्गमुनिःप्रीत्यामयासंप्रार्थितोगमत् ॥ आरिराधयिषुर्दुर्गांविंध्याद्रिंब्राह्मणैस्सह ॥ ५६ ॥ तत्रगत्वाजगद्धात्रींभक्ताभीष्टप्रदायिनीम् ॥ आरा
धयामाससुनिर्जपपाठपरायणः ॥ ५७ ॥ ततस्समाप्तेनियमेवागुवाचाशरीरिणी ॥ प्रसन्नाहंमुनेकार्य्यसिद्धिस्तवभविष्यति ॥ ५८ ॥ भूभारहरणार्थायम
यासंप्रेरितोहरिः ॥ वसुदेवस्यदेवक्यांस्वांशेनावतरिष्यति ॥ ५९ ॥ कंसभीत्यातमादायबालमानकदुंदुभिः ॥ प्रापयिष्यतिसद्यस्तुगोकुलेनन्दवेश्मनि ॥
॥ ६० ॥ यशोदातनयांनीत्वास्वगृहेकंसभूभुजे ॥ दास्यत्यथचतांहंतुंकंसआक्षेप्स्यतिक्षितौ ॥ ६१ ॥ सातद्धस्ताद्विनिर्गत्यसद्योदिव्यवपुर्द्धरा ॥ मदंश
भूताविंध्याद्रौकरिष्यतिजगद्धितम् ॥ ६२ ॥ इतितद्वचनंश्रुत्वाप्रणम्यजगदंबिकाम् ॥ गर्गोमुनिःप्रसन्नात्मामथुरामागमत्पुरीम् ॥ ६३ ॥ वरदानंमहादेव्याग
र्गाचार्य्यमुखादहम् ॥ श्रुत्वासभार्य्यस्संप्रीतःपरांमुदमथागमम् ॥ ६४ ॥ तदारभ्यपरंजानेदेवीमाहात्म्यमुत्तमम् ॥ अधुनापिहिदेवर्षेश्रुतंतवमुखांबुजात्

॥ ६५ ॥ अतोभागवतंदेव्यास्त्वमं ... यादेवदेवर्षेसंप्राप्तोसिदयानिधे ॥ ६६ ॥ वसुदेववचःश्रुत्वानारदःप्रीतमानसः ॥ सुदिनेशुभनक्ष
त्रेकथारंभमथाकरोत् ॥ ६७ ॥ कथाविघ्नविघाताथाद्गजाजेपुर्नवाक्षरम् ॥ मार्कंडेयपुराणोक्तंपेठुर्देव्याःस्तवंतथा ॥ ६८ ॥ प्रथमस्कंधमारभ्यश्रीनारदमुखो
द्गतम्॥शुश्राववसुदेवश्चभक्त्याभागवतामृतम्॥६९॥नवमेह्निकथापूर्त्तौपुस्तकंवाचकंतथा॥प्रसन्नःपूजयामासवसुदेवोमहामनाः ॥ ७० ॥ अथतत्रविलस्यांतः
कृष्णजांबवतोर्मृधे ॥ कृष्णमुष्टिविनिःपातश्लथांगोजांबवानभूत् ॥ ७१ ॥ अथागतस्मृतिस्सोपिभगवंतंप्रणम्यच ॥ उवाचपरयाभक्त्यास्वापराधंक्ष
मापयन् ॥ ७२ ॥ ज्ञातोसिरघुवर्य्यत्वंयद्रोषात्सरितांपतिः ॥ क्षोभंजगामलंकाचरावणःसानुगोहतः ॥ ७३ ॥ सएवासिभवान्कृष्णमद्दौरात्म्यंक्षमस्वभोः॥
ब्रूहियत्करणीयंमेभृत्योहंतवसर्वथा ॥ ७४ ॥ श्रुत्वाजांबवतोवाचमब्रवीज्जगदीश्वरः ॥ मणिहेतोरिहप्राप्तावयमृक्षपतेबिलम् ॥ ७५ ॥ ऋक्षराजस्ततः
प्रीत्याकन्यांजाम्बवतींनिजाम् ॥ ददौकृष्णायसंपूज्यस्यमंतकमणिंतथा ॥ ७६ ॥ सतांपत्नींसमादायमणिंकंठेतथादधन् ॥ अभिमंत्र्यर्क्षराजश्चप्रतस्थेद्वा
रकांप्रति ॥ ७७ ॥ कथासमाप्तिदिवसेवसुदेवउदारधीः ॥ ब्राह्मणान्भोजयामासदक्षिणाभिरतोषयत् ॥ ७८ ॥ आशीर्वाचंप्रयुंजानाद्विजायत्समयेहरिः ॥
आजगामक्षणेतस्मिन्पत्न्यासहमणिंदधन् ॥ ७९ ॥ भार्य्ययासहितंकृष्णंवसुदेवपुरोगमाः ॥ दृष्ट्वाहर्षाश्रुपूर्णाक्षास्समवापुःपरांमुदम् ॥ ८० ॥ देवर्षिर्ना
रदश्चाथकृष्णागमनहर्षितः ॥ आमंत्र्यवसुदेवंचकृष्णंब्रह्मसभांययौ ॥ ८१ ॥ हरिचरितमिदंयत्कीर्तितंदुर्य्यशोघ्नंपठति ... भक्त्याशुद्धचित्तःशृ
णोति ॥ सभवतिसुखपूर्णःसर्वदासिद्धिकामोजगतिचवपुषोन्तेमुक्तिमार्गंलभेच्च ॥ ८२ ॥ ॥ इतिश्रीस्कन्दपुराणेमानसखंडेमहादेवीभागवतमाहात्म्ये
द्वितीयोऽध्यायः ॥२॥ ॥ सूतउवाच ॥ ॥ अथेतिहासमन्यच्चशृणुध्वंमुनिसत्तमाः ॥ देवीभागवतस्यास्यमाहात्म्यंयत्रगीयते ॥१॥ एकदाकुंभयोनिस्तु
लोपामुद्रापतिर्मुनिः ॥ गत्वाकुमारमभ्यर्च्यपप्रच्छविविधाःकथाः ॥ २ ॥ सतस्मैभगवान्स्कन्दःकथयामास ... ॥दानतीर्थव्रतादीनांमाहात्म्योपचिताः
कथाः ॥ ३ ॥ वाराणस्याश्चमाहात्म्यंमणिकर्णीभवंतथा ॥ गंगायाश्चापितीर्थानांवर्णितंबहुविस्तरम् ॥ ४ ॥ श्रुत्वाथसमुनिःप्रीतःकुमारंभूरिवर्च्चसम् ॥
पुनःपप्रच्छलोकानांहितार्थंकुंभसंभवः ॥ ५ ॥ अगस्त्यउवाच ॥ भगवंस्तारकारातेदेवीभागवतस्यतु ॥ माहात्म्यंश्रवणेतस्यविधिंचापिवदप्रभो ॥ ६ ॥
देवीभागवतंनामपुराणंपरमोत्तमम् ॥ त्रैलोक्यजननीसाक्षाद्गीयतेयत्रशाश्वती ॥ ७ ॥ स्कंदउवाच ॥ श्रीभागवतमाहात्म्यंकोवक्तुंविस्तरात्क्षमः ॥ ...
णुसंक्षेपतोब्रह्मन्कथयिष्यामिसांप्रतम् ॥ ८ ॥ यानित्यासच्चिदानन्दरूपिणीजगदम्बिका ॥ साक्षात्समाश्रितायत्रभुक्तिमुक्तिप्रदायिनी ॥ ९ ॥ अतस्त...र्या
मूर्त्तिर्देवीभागवतंमुने ॥ पठनाच्छ्रवणाद्यस्यनकिंचिदिहदुर्लभम् ॥ १० ॥ आसीद्विवस्वतःपुत्रःश्राद्धदेवइतिश्रुतः ॥ सोऽनपत्योकरोदिष्टिंवसिष्ठानुमतो

नृपः ॥ ११ ॥ होतारंप्रार्थयामासश्रद्धाथदयितामनोः ॥ कन्याभवतुमेब्रह्मंस्तथोपायंविधीयताम् ॥ १२ ॥ मनसाचिंतयन्होताकन्यामेवा[illegible]होद्धविः ॥
ततस्तद्व्यभिचारेणकन्येलानामचाभवत् ॥ १३ ॥ अथराजासुतांदृष्ट्वाप्रोवाचविमनागुरुम् ॥ कथंसंकल्पवैषम्यमिहजातंप्रभोतव ॥ १४ ॥ [illegible]त्वा
समुनिर्दध्यौज्ञात्वाहोतुर्व्यतिक्रमम् ॥ ईश्वरंशरणंयातइलायाःपुंस्त्वकाम्यया ॥ १५ ॥ मुनेस्तपःप्रभावाच्चपरेशानुग्रहात्तथा ॥ पश्यतांसर्वलोकाना
मिलापुरुषतामगात् ॥ १६ ॥ गुरुणाकृतसंस्कारःसुद्युम्नोथमनोस्सुतः ॥ निधिर्बभूवविद्यानांसरितामिवसागरः ॥ १७ ॥ अथकालेनसुद्युम्नस्तारुण्यंसम
वाप्यच ॥ मृगयार्थंवनंयातोहयमारुह्यसैन्धवम् ॥ १८ ॥ वनाद्वनांतरंगच्छन्बहुवभ्रामसानुगः ॥ दैवादधस्ताद्धेमाद्रेस्सकुमारोवनंययौ ॥ १९ ॥ कस्मिं
श्चित्समयेतत्रभार्य्ययापर्णयासह ॥ अरमद्देवदेवस्तुशंकरोभगवान्मुदा ॥ २० ॥ तदातुमुनयस्तत्रशिवदर्शन[illegible]लसाः ॥ आजग्मुरथतान्दृष्ट्वागिरिजाव्रीडि
ताभवत् ॥ २१ ॥ रममाणौतुतौदृष्ट्वागिरिशौसंशितव्रताः ॥ निवृत्तामुनयोजग्मुर्वैकुण्ठनिलयंतदा ॥ २२ ॥ प्रियायाःप्रियमन्विच्छंश्छिवोरण्यंशशापह ॥ अद्यारभ्य
विशेद्योत्रपुमान्योषिद्भवेदिति ॥ २३ ॥ ततआरभ्यतंदेशंपुरुषावर्ज्जयंतिहि ॥ तत्रप्रविष्टःसुद्युम्नोवभूवप्रमदोत्तमा ॥ २४ ॥ स्त्रीभूताननुग[illegible] ॥ [illegible]वडवांवीक्ष्यविस्मितः ॥
अथसासुन्दरीयोषाविचचारवनेवने ॥ २५ ॥ एकदासाजगामाथबुधस्याश्रमसन्निधौ ॥ दृष्ट्वातांचारुसर्वांगींपीनोन्नतपयोधरा[illegible]वत ॥ २६ ॥ बिंबोष्ठींकुन्द
दशनांसुमुखींसुत्पलेक्षणाम् ॥ अनंगशरविद्धांगश्चकमेभगवान्बुधः ॥ २७ ॥ सापितंचकमेसुभ्रूःकुमारंसोमनंदनम् ॥ ततस्तस्याश्रमेवासीद्रममाणाबुधे
नसा ॥ २८ ॥ अथकालेनकियतापुरूरवसमात्मजम् ॥ सतस्यांजनयामासमित्रावरुणसंभव ॥ २९ ॥ अथवर्षेषुयातेषुकदाचित्साबुधाश्रमे ॥ स्मृत्वा
स्वंपूर्ववृत्तांतंदुःखितानिर्जगामह ॥ ३० ॥ गुरोरथाश्रमंगत्वावासिष्ठस्यप्रणम्यतम् ॥ निवेद्यवृत्तंशरणंययौपुंस्त्वमभीप्सती ॥ ३१ ॥ वसिष्ठोज्ञातवृत्तांतो
गत्वाकैलासपर्वतम् ॥ संपूज्यशंभुंतुष्टावभक्त्यापरमयायुतः ॥ ३२ ॥ वसिष्ठउवाच ॥ नमोनमःशिवायास्तुशंकरायकपर्द्दिने ॥ गिरिजार्द्धांगदेहायनम
स्तेचंद्रमौलिने ॥ ३३ ॥ मृडायसुखदात्रेतेनमःकैलासवासिने ॥ नीलकण्ठायभक्तानांभुक्तिमुक्तिप्रदायिने ॥ ३४ ॥ शिवायशिवरूपायप्रपन्नभयहारिणे ॥ नमो
वृषभवाहायशरण्यायपरात्मने ॥ ३५ ॥ ब्रह्मविष्ण्वीशरूपायसर्गस्थितिलयेषुच ॥ नमोदेवाधिदेवायवरदायपुरारये ॥ ३६ ॥ यज्ञरूपाययजतांफल
दात्रेनमोनमः ॥ गंगाधरायसूर्य्येन्दुशिखिनेत्रायतेनमः ॥ ३७ ॥ एवंस्तुतस्सभगवान्प्रादुरासीज्जगत्पतिः ॥ वृषारूढोम्बिकोपेतःकोटिसूर्य्यसमप्रभः ॥
॥ ३८ ॥ रजताचलसंकाशस्त्रिनेत्रश्चंद्रशेखरः ॥ प्रणतंपरितुष्टात्माप्रोवाचमुनिसत्तमम् ॥ ३९ ॥ श्रीभगवानुवाच ॥ वरंवरयविप्रर्षेयत्तेमनसिवर्त्तते ॥ इत्यु
क्तस्तंप्रणम्येलापुंस्त्वमभ्यर्थयन्मुनिः ॥ ४० ॥ अथ[illegible]भगवानुवाचमुनिसत्तमम् ॥ मासंपुमान्सभवितामासंनारीभविष्यति ॥ ४१ ॥ इतिप्राप्यवरं

शंभोर्मेहर्षिर्ज्जगदम्बिकाम् ॥ वरदाना[...] हेश्वरीम् ॥ ४२ ॥ कोटिचंद्रकलाकान्तिसुस्मितांपरिपूज्यच ॥ तुष्टावभक्त्यासततमिलायाः
पुंस्त्वकाम्यया ॥ ४३ ॥ जयदेविमहादेविभक्तानुग्रहकारिणि ॥ जयसर्वसुराराध्येजयानन्तगुणालये ॥ ४४ ॥ नमोनमस्तेदेवेशिशरणागतवत्सले ॥
जयदुर्गेदुःखहंत्रिदुष्टदैत्यानिषूदिनि ॥ ४५ ॥ भक्तिगम्येमहामायेनमस्तेजगदम्बिके ॥ संसारसागरोत्तारपोतीभूतपदाम्बुजे ॥ ४६ ॥ ब्रह्मादयोपिविबुधा
स्त्वत्पादांबुजसेवया ॥ विश्वसर्गस्थितिलयप्रभुत्वंसमवाप्नुयुः ॥ ४७ ॥ प्रसन्नाभवदेवेशिचतुर्वर्गप्रदायिनि ॥ कस्त्वांस्तोतुंक्षमोदेविकेवलंप्रणतोस्म्य
हम् ॥ ४८ ॥ एवंस्तुताभगवतीदुर्गानारायणीपरा ॥ भक्त्यावसिष्ठमुनिनाप्रसन्नातत्क्षणादभूत् ॥ ४९ ॥ तदोवाचमहादेवीप्रणतार्तिहरीमुनिम् ॥ सुद्युम्न
भवनंगत्वाकुरुभक्त्यामदर्च्चनम् ॥ ५० ॥ सुद्युम्नंश्रावयप्रीत्यापुराणंमत्प्रियंकरम् ॥ देवीभागवतंनामनवाहोभिर्द्विजोत्तम ॥ ५१ ॥ श्रवणादेवसततंपुं
स्त्वमस्यभविष्यति ॥ इत्युक्त्वाचातिरोधानंगच्छतःस्माशिवेश्वरौ ॥ ५२ ॥ वसिष्ठस्तांदिशंनत्वासमागत्याश्रमंनिजम् ॥ समाहूयचसुद्युम्नंदेव्याराधनमा
दिशत् ॥ ५३ ॥ आश्विनस्यासितेपक्षेसंपूज्यजगदंबिकाम् ॥ नवरात्रविधानेनश्रावयामासभूपतिम् ॥ ५४ ॥ श्रुत्वाभक्त्यापिसुद्युम्नःश्रीमद्भागवतामृतम् ॥
प्रणम्याभ्यर्च्यचगुरुंलेभेपुंस्त्वंनिरंतरम् ॥ ५५ ॥ राज्यासनेऽभिषिक्तस्तुवसिष्ठेनमहर्षिणा ॥ भुवंशशासधर्मेणप्रजाश्चैवानुरंजयन् ॥ ५६ ॥ ईजेचविविधै
र्यज्ञैःसंपूर्णवरदक्षिणैः ॥ पुत्रेषुराज्यंसंदिश्यप्रापदेव्याःसलोकताम् ॥५७॥ इतिकथितमशेषंसेतिहासंचविप्रायदिपठतिसुभक्त्या[...]नैव[...]वाशृणोति ॥ सइह
सकलकामान्प्राप्यदेव्याःप्रसादात्परममृतमथान्तेयातिदेव्यास्सलोकम् ॥५८॥ ॥ इतिश्रीस्कंदपुराणेमानसखण्डेदेवीभागवत[मा]हात्म्येतृतीयोध्यायः॥ ३ ॥
सूतउवाच ॥ इतिश्रुत्वाकथांदिव्यांविचित्रांकुंभसंभवः ॥ शुश्रूषुःपुनराहेदंविशाखंविनयान्वितः ॥ १ ॥ अगस्त्यउवाच ॥ देवसेनापतेदेवविचित्रेयंश्रुताक
था ॥ पुनरन्यच्चमाहात्म्यंवदभागवतस्यमे ॥ २ ॥ स्कंदउवाच ॥ मित्रावरुणसंभूतमुनेशृणुकथामिमाम् ॥ यत्रैकदेशमहिमाप्रोक्तोभागवतस्यतु ॥ ३ ॥
वर्ण्यतेधर्म्मविस्तारोगायत्रीमधिकृत्यच ॥ गायत्र्यामहिमायत्रतद्भागवतमिष्यते॥४॥भगवत्याइदंयस्मात्तस्माद्भागवतंविदुः॥ब्रह्मविष्णुशिवाराध्यापरागवती
हिसा॥५॥ऋतवागितिविख्यातोमुनिरासीन्महामतिः॥तस्यपुत्रोभवत्कालेगण्डान्तेपौष्णभान्तिमे॥६॥सतस्यजातकर्म्मादिक्रियाश्चक्रेयथाविधि॥चूडोपनय
नादींश्चसंस्कारानपिसोकरोत्॥७॥यतआरभ्यजातोसौपुत्रस्तस्यमहात्मनः॥ततएवाथसमुनिश्शोकरोगाकुलोभवत्॥८॥ रोषलोभपरीतात्मातथामातापितु
स्यच ॥ बहुरोगार्दितानित्यंशुचादुःखीकृताभृशम्॥९॥ऋतवाक्समुनिश्चिन्तामवापभृशदुःखितः॥किमेतत्कारणंजातंपुत्रोमेत्यंतदुर्म्मतिः॥१०॥कस्य[...]
निपुत्रस्यबलात्पत्नींजहारच ॥ मेनेशिक्षांपितुर्नासौनचमातुर्विमूढधीः ॥ ११ ॥ ततोविषण्णचित्तस्तुऋतवागब्रवीदिदम् ॥ अपुत्रतावरंनॄणां[...]कदाचित्कु

पुत्रता ॥ १२ ॥ कुपुत्रःस्वर्गतान्पितॄन्निरयेपातयत्यापि ॥ यावज्जीवन्त्सदापित्रोःकेवलंदुःखदायकः ॥ १३ ॥ पित्रोर्दुःखायधिग्जन्मकुपुत्रस्यचय
सुहृदांनोपकारायनापकारायवैरिणाम् ॥ १४ ॥ धन्यास्तेमानवालोकेसुपुत्रोयद्गृहेस्थितः ॥ परोपकारशीलश्चापितुर्मातुःसुखावहः ॥ १५ ॥ कु
लंनष्टंकुपुत्रेणहतंयशः ॥ कुपुत्रेणेहचामुत्रदुःखंनिरययातनाः ॥ १६ ॥ कुपुत्रेणान्वयोनष्टोजन्मनष्टंकुभार्य्यया ॥ कुभोजनेनदिवसःकुमित्रेणसुखंकुतः ॥
॥ १७ ॥ स्कन्दउवाच ॥ एवंदुष्टस्यपुत्रस्यदुष्टैराचरणैर्मुनिः ॥ तप्यमानोनिशंकालेगत्वागर्गमपृच्छत ॥ १८ ॥ ऋतवागुच ॥ भगवंस्त्वामहंप्रष्टुमिच्छा
मिवदतत्प्रभो ॥ ज्योतिश्शास्त्रस्यचाचार्य्यपुत्रदौःशील्यकारणम् ॥ १९ ॥ गुरुशुश्रूषयावेदाःप्राधीताविधिवन्मया ॥ ब्रह्मचारिव्रतंतीर्त्वाविवाहोविधिवत्कृ
तः ॥ २० ॥ भार्य्ययासहगार्हस्थ्यधर्म्मश्चानुष्ठितोनिशम् ॥ पंचयज्ञविधानंचमयाकारियथाविधि ॥ २१ ॥ नरकाद्बिभ्यताविप्रनतुकामसुखेच्छया ॥ ग
र्भाधानंचविधिवत्पुत्रप्राप्त्यैमयाकृतम् ॥ २२ ॥ पुत्रोयंममदोषेणमातुर्दोषेणवामुने ॥ जातोदुःखावहःपित्रोर्दुःशीलोबंधुशोकदः ॥ २३ ॥ एतन्नि
शम्यवचनंगर्गाचार्य्योमुनेस्तदा ॥ विचार्य्यसर्वंतद्धेतुंज्योतिर्विद्वाचमब्रवीत् ॥ २४ ॥ गर्गउवाच ॥ ॥ मुनेनैवापराधस्तेनमातुर्नकुलस्यच ॥ रे
वत्यंतंतुगण्डान्तंपुत्रदौःशील्यकारणम् ॥ २५ ॥ दुष्टेकालेयतोजन्मपुत्रस्यतवभोमुने ॥ तेनैवतवदुःखायनान्योहेतुर्मनागपि ॥ २६ ॥ तद्दुः
खशांतयेब्रह्मञ्जगतांमातरंशिवाम् ॥ समाराधययत्नेनदुर्गांदुर्गतिनाशिनीम् ॥ २७ ॥ गर्गस्यवचनंश्रुत्वाऋतवाक्रोधमूर्छितः ॥ रेवतींतुशशापासौ
व्योम्नःपततुरेवती ॥ २८ ॥ दत्तेशापेतुतेनाथपूष्णोभंचपपातखात् ॥ कुमुदाद्रौभासमानंसर्वलोकस्यपश्यतः ॥ २९ ॥ ख्यातोरैवतकश्चाभूत्त
त्पातात्कुमुदाचलः ॥ अतीवरमणीयश्चततःप्रभृतिसोप्यभूत् ॥ ३० ॥ दत्त्वाशापंचरेवत्यैगर्गोक्तविधिनामुनिः ॥ समाराध्यांबिकांदेवींसुखसौभाग्य
भागभूत् ॥ ३१ ॥ स्कन्दउवाच ॥ रेवत्यृक्षस्ययत्तेजस्तस्माज्जातातुकन्यका ॥ रूपेणाप्रतिमालोकेद्वितीयाश्रीरिवाभवत् ॥ ३२ ॥ अथतांप्रमुचः
कन्यांरेवतीकांतिसंभवाम् ॥ दृष्ट्वानामचकारास्यारेवतीतिमुदामुनिः ॥ ३३ ॥ निन्येथस्वाश्रमेचैनांपोषयामासधर्मतः ॥ प्रमुचोनामब्रह्मर्षिःकुमुदाद्रौसुतामिव
॥ ३४ ॥ अथकालेनचप्रौढांदृष्ट्वातांरूपशालिनीम् ॥ समुनिश्चिन्तयामासकोस्यायोग्योवरोभवेत् ॥ ३५ ॥ बहुधान्वेषयंस्तस्यानाससादोचि
तंपतिम् ॥ ततोग्निशालांसंविश्यमुनिस्तुष्टावपावकम् ॥ ३६ ॥ कन्यावरंतदाशंसत्प्रीतस्तमपिहव्यवाट् ॥ धर्म्मिष्ठोबलवान्वीरःप्रियवागपराजितः
॥ ३७ ॥ दुर्दमोभविताभर्तामुनेऽस्याःपृथिवीपतिः ॥ इतिश्रुत्वावचोवह्नेःप्रसन्नोभून्मुनिस्तदा ॥ ३८ ॥ दैवादाखेटकव्याजात्तत्क्षणादागतोनृपः ॥ दुर्द
मोनाममेधावीतस्याश्रमपदंमुनेः ॥ ३९ ॥ पत्रोवि[illegible]पशीलस्य[illegible]लवान्वीर्य्यवत्तरः ॥ कालिंदीजठरेजातःप्रियव्रतकुलोद्भवः ॥ ४० ॥ मुनेराश्रममाविश्य

तमद्दष्ट्वामहामुनिम् ॥ आमंत्र्यता[illegible] ॥ ४१ ॥ राजोवाच ॥ महर्षिर्भगवानस्मादाश्रमात्क्वगतःप्रिये ॥ तत्पादौद्रष्टुमिच्छामिवदक
ल्याणितत्वतः ॥ ४२ ॥ कन्योवाच ॥ अग्निशालामुपगतोमहाराजमहामुनिः ॥ निश्चक्रामाश्रमात्तूर्णंराजाप्याकर्ण्यतद्वचः ॥ ४३ ॥ अथाग्निशालाद्वार
स्थंराजानंदुर्दमंमुनिः ॥ राजलक्षणसंयुक्तमपश्यत्प्रश्रयानतम् ॥ ४४ ॥ प्रणनामचतंराजामुनिःशिष्यमुवाचह ॥ गौतमानीयतामर्घ्यमर्घ्ययोग्योस्तिभूप
तिः ॥ ४५ ॥ आगतीश्चरकालेनजामातेतिविशेषतः ॥ इत्युक्त्वार्घ्यंददौतस्मैसोपिजग्राहचिन्तयन् ॥ ४६ ॥ मुनिरासनमासीनंगृहीतार्घ्यंचभूपतिम् ॥
आशीर्भिरभिनंद्याथकुशलंचाप्यपृच्छत ॥ ४७ ॥ अपितेऽनामयंराजन्बलेकोशेसुहृत्सुच ॥ भृत्येऽमात्येपुरेदेशेतथात्मनिजनाधिप ॥ ४८ ॥ भार्य्या
स्तितेकुशलिनियतःसात्रैवतिष्ठति ॥ अतोनपृच्छाम्यस्यास्तेचान्यासांकुशलंवद ॥ ४९ ॥ राजोवाच ॥ भगवंस्त्वत्प्रसादेनसर्वत्रानामयंमम ॥ एतत्कौ
तूहलंब्रह्मन्मद्भार्याकात्रविद्यते ॥ ५० ॥ ऋषिरुवाच ॥ रेवतीनामतेभार्य्यारूपेणाप्रतिमाभुवि ॥ विद्यतेऽत्रकथंपत्नींतांनवेत्सिमहीपते ॥ ५१ ॥ राजोवाच
॥ सुभद्राद्यास्तुयाभार्य्याममसन्तिगृहेविभो ॥ जानामितास्तुभगवन्नैवजानामिरेवतीम् ॥ ५२ ॥ ऋषिरुवाच ॥ प्रियेतिसांप्रतंराजंस्त्वयोक्तायामहामते ॥
साविस्मृताक्षणादेवयातेश्लाघ्यतमाप्रिया ॥ ५३ ॥ राजोवाच ॥ त्वयोक्तंयन्मृषातन्नोतथैवामंत्रितामया ॥ मुनेदुष्टोनमेभावोकोपंमाकर्तुमर्हसि ॥ ५४ ॥
ऋषिरुवाच ॥ राजन्नुक्तंत्वयासत्यंनभावोदूषितस्तव ॥ वह्निनाप्रेरितेनेत्थंभवताव्याहृतंवचः ॥ ५५ ॥ अद्यपृष्टोमयावह्निःकोऽस्याभर्त्ताभविष्यति ॥
तेनोक्तंदुर्दमोराजाभवितास्याःपतिर्ध्रुवम् ॥ ५६ ॥ तदादत्स्वमयादत्तामिमांकन्यांमहीपते ॥ प्रियेत्यामंत्रितापूर्वंमाविचारंकुरुष्वभो ॥ ५७ ॥ श्रुत्वैत
त्सोऽभवत्तूर्ष्णींचिंतयन्मुनिभाषितम् ॥ वैवाहिकंविधिंतस्यामुनिःकर्तुंसमुद्यतः ॥ ५८ ॥ अथोद्यतंविवाहायदृष्ट्वाकन्याब्रवीन्मुनिम् ॥ रेवत्यृक्षेविवाहंमेता
तकर्तुंत्वमर्हसि ॥ ५९ ॥ ऋषिरुवाच ॥ वत्सेविवाहयोग्यानिसंत्यन्यर्क्षाणिभूरिशः ॥ रेवत्यांकथमुद्वाहःपौष्णभंनदिविस्थितम् ॥ ६० ॥ कन्योवाच ॥
रेवत्यृक्षंविनाकालोममोद्वाहोचितोनाहि ॥ अतःसंप्रार्थयाम्येतद्विवाहंपौष्णभेकुरु ॥ ६१ ॥ ऋषिरुवाचं ॥ ऋतवाग्मुनिनापूर्वंरेवतीभंनिपातितम् ॥ भान्तरे
चेन्नतेप्रीतिर्विवाहःस्यात्कथंतव ॥ ६२ ॥ कन्योवाच ॥ तपःकिंतप्तवानेकोऋतवागेवकेवलम् ॥ भवताकिंतपोनेहकृतंतंवाक्कायमानसैः ॥ ६३ ॥
जगत्स्रष्टुंसमर्थस्त्वंवेद्म्यहंतेतपोबलम् ॥ रेवत्यृक्षंदिविस्थाप्यममोद्वाहंपितःकुरु ॥ ६४ ॥ ऋषिरुवाच ॥ एवंभवतुभद्रंतेयथैवत्वंब्रवीषिमाम् ॥ त्वत्कृते
सोममार्गेहंस्थापयाम्यद्यपौष्णभम् ॥ ६५ ॥ स्कन्दउवाच ॥ एवमुक्त्वामुनिस्तूर्णंपौष्णभंस्वतपोबलात् ॥ यथापूर्वंतथाचक्रेसोममार्गेवटोद्भव ॥ ६६ ॥
रेवतीनाम्निनक्षत्रेविवाहविधिनामुनिः ॥ रेवतींप्रददौराज्ञेदुर्दमायमहात्मने ॥ ६७ ॥ कृत्वाविवाहंकन्यायामुनीराजानमब्रवीत ॥ किंतेऽभिलषितंवीरवदत

त्पूरयाम्यहम् ॥ ६८ ॥ राजोवाच ॥ मनोःस्वायंभुवस्याहंवंशेजातोस्म्यहंमुने ॥ मन्वंतराधिपंपुत्रंत्वत्प्रसादाच्चकामये ॥ ६९ ॥ मुनिरुवाच ॥ यु
नातेस्तिदेव्याआराधनंकुरु ॥ भविष्यत्येवतेपुत्रोमनुर्मन्वंतराधिपः ॥ ७० ॥ देवीभागवतंनामपुराणंयत्तुपंचमम् ॥ पंचकृत्वस्तुतच्छ्रुत्वा
मतंसुतम् ॥ ७१ ॥ रेवत्यांरैवतोनामपंचमोभवितामनुः ॥ वेदविच्छास्त्रतत्त्वज्ञोधर्म्मवानपराजितः ॥ ७२ ॥ इत्युक्तोमुनिनाराजाप्रणम्यमुदितोमुनि
भार्य्ययासहमेधावीजगामनगरंनिजम् ॥ ७३ ॥ पितृपैतामहंराज्यंचकारसमहामतिः ॥ पालयामासधर्म्मात्माप्रजाःपुत्रानिवौरसान् ॥ ७४ ॥ एकदालोम
शोनाममहात्मामुनिरागतः ॥ प्रणिपत्यतमभ्यर्च्यप्रांजलिश्चाब्रवीन्नृपः ॥ ७५ ॥ राजोवाच ॥ भगवंस्त्वत्प्रसादेनश्रोतुमिच्छामिभोमुने॥देवीभागवतंनाम
पुराणंपुत्रलिप्सया ॥ ७६ ॥ श्रुत्वावाचंप्रजाभर्त्तुःप्रीतःप्रोवाचलोमशः ॥ धन्योसिराजंस्तेभक्तिर्ज्जातात्रैलोक्यमातरि ॥ ७७ ॥ सुरासुरनराराध्यायापराज
गदम्बिका ॥ तस्यांचेद्भक्तिरुत्पन्नाकार्य्यंसिद्धिर्भविष्यति ॥ ७८ ॥ अतस्त्वांश्रावयिष्यामिश्रीमद्भागवतंनृप ॥ यस्यश्रवणमात्रेणनकिंचिदपिदुर्ल्लभम् ॥
॥ ७९ ॥ इत्युक्त्वासुदिनेब्रह्मन्कथारंभमथाकरोत् ॥ पंचकृत्वस्सशुश्रावविधिवद्भार्य्ययासह ॥ ८० ॥ समाप्तिदिवसेराजापुराणंचमुनिंतथा ॥ पूजयामास
धर्म्मात्मामुदापरमयायुतः ॥ ८१ ॥ हुत्वानवार्णमंत्रेणभोजयित्वाकुमारिकाः ॥ वाडवांश्चसपत्नीकान्दक्षिणाभिरतोषयत् ॥ ८२ ॥ अथकालेनकियता
भगवत्याःप्रसादतः ॥ गर्भन्दधारसाराज्ञीलोककल्याणकारकम् ॥ ८३ ॥ पुण्येथसमयेप्राप्तेग्रहैःसुस्थानसंगतैः ॥ सर्वमंगलसंपन्नेरेवतीसुषुवेसुतम् ॥ ८४ ॥
श्रुत्वापुत्रस्यजननंस्नात्वाराजामुदान्वितः ॥ ससुवर्णाभसाचक्रेजातकर्म्मादिकाःक्रियाः ॥ ८५ ॥ यथाविधिचदानानिदत्त्वाविप्रानतोषयत् ॥ कृतोपनयनं
राजासांगान्वेदानपाठयत् ॥ ८६ ॥ सर्वविद्यानिधिर्ज्जातोधर्म्मिष्ठोस्त्रविदांवरः ॥ धर्मस्यवक्ताकर्त्ताचरैवतोनामवीर्य्यवान् ॥ ८७ ॥ नियुक्तवानथब्रह्मारैवतं
मानवेपदे ॥ मन्वंतराधिपःश्रीमान्गांशशाससधर्म्मतः ॥८८॥ इत्थंदेव्याःप्रभावोयंसंक्षेपेणोपवर्णितः ॥ पुराणस्यचमाहात्म्यंकोवक्तुंविस्तरात्क्षमः ॥ ८९ ॥
सूतवाच ॥ कुंभयोनिस्तुमाहात्म्यंविधिंभागवतस्यच ॥ श्रुत्वाकुमारंचाभ्यर्च्यस्वाश्रमंपुनराययौ ॥ ९० ॥ इदंमयाभागवतस्यविप्रामाहात्म्यमुक्तंभवतां
समक्षम् ॥ शृणोतिभक्त्यापठतीहभोगान्भुक्त्वाखिलान्मुक्तिमुपैतिचांते ॥९१॥ ॥ इतिश्रीस्कंदपुराणेमानसखण्डेश्रीदेवीभागवतमाहात्म्येचतुर्थोऽध्यायः
॥ ४ ॥ ॥ ऋषयऊचुः ॥ सूतसूतमहाभागश्रुतंमाहात्म्यमुत्तमम् ॥ अधुनाश्रोतुमिच्छामःपुराणश्रवणेविधिम् ॥ १ ॥ सूतउवाच ॥ श्रूयतांमुनयस्सर्वे
पुराणश्रवणेविधिम् ॥ नराणांशृण्वतांयेनसिद्धिःस्यात्सार्वकामिकी॥२॥आदौदैवज्ञमाहूयमुहूर्त्तंकल्पयेत्सुधीः॥ आरभ्यशुचिमासंतुमासषट्कंशुभावहम्॥३॥
हस्ताश्विमूलपुष्यर्क्षेब्रह्ममैत्रेन्दुवैष्णवे॥ सतिथौशुभवारेचपुराणश्रवणंशुभम् ॥४॥ गुरुभाद्वेद४वेदा ४ ज१शरां५गा६ब्धि४गुणाः३क्रमात्॥धर्म्मोतिरिदिंरा

प्राप्तिः कथासिद्धिःपरंसुखम् ॥ ५ ॥ [illegible] ...प्तिः क्रमात्फलम् ॥ पुराणश्रवणेचक्रंशोधयेच्छिवभाषितम् ॥ ६ ॥ अथवाप्रीतयेदेव्यानवरा
त्रचतुष्टये ॥ शृणुयादन्यमासेपितिथिवारर्क्षशोधत ॥ ७ ॥ संभारंयादृशंकार्य्यंविवाहादौचतादृशम् ॥ नवाहयज्ञेचाप्यस्मिन्विधेयंयत्नतोबुधैः ॥ ८ ॥
सहायाबहवःकार्य्यादंभलोभविवर्जिताः ॥ चतुराश्चवदान्याश्चदेवीभक्तिपरानराः ॥ ९ ॥ प्रेष्यायत्नेनवार्त्तैयंदेशेदेशेजनेजने ॥ आगन्तव्यमिहावश्यंक
थादेव्याभविष्यति ॥ १० ॥ सौराश्चगाणपत्याश्चशैवाश्शाक्ताश्चवैष्णवाः ॥ सर्वेषामपिसेव्येयंयतोदेवास्सशक्तयः ॥ ११ ॥ श्रीमद्देवीभागवतपीयूषरसलो
लुपैः ॥ आगंतव्यंविशेषेणकथार्थप्रेमतत्परैः ॥ १२ ॥ ब्राह्मणाद्याश्चयेवर्णाःस्त्रियश्चाश्रमिणस्तथा ॥ सकामाश्चापिनिःष्कामाःपातव्यंतैःकथामृतम् ॥ १३ ॥
नावकाशःकदाचित्स्यान्नवाहश्रवणेपितैः ॥ आगंतव्यंयथाकालंयज्ञेपुण्याक्षणस्थितिः ॥ १४ ॥ विनयेनैवकर्त्तव्यमेवमाकारणंनृणाम् ॥ आगतानांच
कर्त्तव्यंवासस्थानंयथोचितम् ॥ १५ ॥ कथास्थानंप्रकर्त्तव्यंभूमौमार्ज्जनपूर्वकम् ॥ लेपनंगोमयेनाथविशालायांमनोरमम् ॥ १६ ॥ कार्य्यस्तुमण्डपो
रम्योरंभास्तंभोपशोभितः ॥ वितानमुपरिष्टात्तुपताकाध्वजराजितः ॥ १७ ॥ वक्तुश्चैवासनंदिव्यंसुखास्तरणसंयुतम् ॥ रचितव्यंप्रयत्नेनप्राङ्मुखंवाह्यु
दङ्मुखम् ॥ १८ ॥ यथोचितानिकुर्वीतश्रोतॄणामासनानिच ॥ नृणांचैवाथनारीणांकथाश्रवणहेतवे ॥ १९ ॥ वाग्मीदांतश्चशास्त्रज्ञो
देव्याराधनतत्परः ॥ दयालुर्निस्पृहोदक्षोधीरोवक्तोत्तमोमतः ॥ २० ॥ ब्रह्मण्योदेवताभक्तःकथारसपरायणः ॥ उदारोऽलोलुपोनम्रःश्रोताहिं
सादिवर्जितः ॥ २१ ॥ पाखण्डनिरतोलुब्धःस्त्रैणोधर्मध्वजस्तथा ॥ निष्ठुरःक्रोधनोवक्तादेवीयज्ञेनशस्यते ॥ २२ ॥ संशयच्छेदनायैकःपण्डितश्चतथागु
णः ॥ श्रोतृबोधकृदव्यग्रःकार्य्योवक्तुस्सहायकृत ॥ २३ ॥ मुहूर्त्तादिवसादर्वाग्वक्तृश्रोत्रादिभिर्ज्जनैः ॥ कर्त्तव्यंक्षौरकर्म्मादिततोनियमकल्पनम् ॥ २४ ॥
अरुणोदयवेलायांस्नायाच्छौचंविधायच ॥ संध्यांतर्पणकार्य्यंचनित्यंसंक्षेपतश्चरेत् ॥ २५ ॥ कथाश्रवणयोग्यत्वसिद्धयेगाश्चदापयेत् ॥ समस्तविघ्नहर्त्ता
रमादौगणपतिंयजेत् ॥ २६ ॥ कलशांश्चापिसंस्थाप्यपूजयेत्तत्रदिग्धवान् ॥ बटुकंक्षेत्रपालंचयोगिनीर्मातृकास्तथा ॥ २७ ॥ तुलसींचापिसंपूज्यग्रहा
न्विष्णुंचशंकरम् ॥ नवाक्षरेणमनुनापूजयेज्जगदम्बिकाम् ॥ २८ ॥ सर्वोपचारैस्संपूज्यश्रीभागवतपुस्तकम् ॥ श्रीदेव्यावाङ्मयींमूर्तिंयथावच्छोभना
क्षरम् ॥ २९ ॥ कथाविघ्नोपशांत्यर्थंवृणुयात्पंचवाडवान् ॥ जाप्योनवार्णमंत्रस्तैःपाठ्यस्सप्तशतीस्तवः ॥ ३० ॥ प्रदक्षिणांनमस्कारान्कृत्वांतेस्तुतिमाचरेत् ॥
कात्यायनिमहामायेभवानिभुवनेश्वरि ॥ ३१ ॥ संसारसागरेमग्नंमामुद्धरकृपामये ॥ ब्रह्मविष्णुशिवाराध्येप्रसीदजगदंबिके ॥ ३२ ॥ मनोभि[illegible]त
देवीवरंदेहिनमोस्तुते ॥ इतिसंप्रार्थ्यशृणुयात्कथांनियतमानसः ॥ ३३ ॥ वक्तारंचापिसंपूज्यव्यासबुद्ध्यायतात्मवान् ॥ माल्यालंकारवस्त्राद्यैस्संपूज्यप्रा

ध्येयव्रतम् ॥ ३४ ॥ सर्वशास्त्रेतिहासज्ञव्यासरूपनमोस्तुते ॥ कथाचंद्रोदयेनांतस्तमस्तोमंनिराकुरु ॥ ३५ ॥ तदग्रेतुनवाहान्तंकु...
नियमास्ततदा ॥ विप्रादीनुपवेश्यादौसंपूज्योपविशेत्स्वयम् ॥ ३६ ॥ श्रोतव्यंसावधानेनचतुर्वर्गफलाप्तये ॥ गृहपुत्रकलत्राप्तधनचिंतामपारी
॥ ३७ ॥ सूर्य्योदयंसमारभ्यर्किंचित्सूर्य्येऽवशेषिते ॥ मुहूर्त्तमात्रेविश्राम्यमध्याह्नेवाचयेत्सुधीः ॥ ३८ ॥ मलमूत्रजयायैषांलघुभोजनमिष्ट
हविष्यान्नंवरंभोज्यंसकृद्देवकथार्थिना ॥ ३९ ॥ अथवास्यात्फलाहारीपयोभुग्वाघृताशनः ॥ यथास्यान्नकथाविघ्नस्तथाकार्यंविचक्षणैः ॥ ४० ॥ कथा
श्रवणनिष्ठानांवक्ष्यामिनियमंद्विजाः ॥ ब्रह्मविष्णुमहेशानांमध्येयेभेददर्शिनः ॥ ४१ ॥ देवीभक्तिविहीनायेपाखण्डाहिंसकाःखलाः ॥ विप्रद्रुहोनास्तिका
येनतेयोग्याःकथाश्रवे ॥ ४२ ॥ ब्रह्मस्वहरणेलुब्धाःपरदारधनेषुच ॥ देवस्वहरणेतेषांनाधिकारःकथाश्रवे ॥ ४३ ॥ ब्रह्मचारीचभूशायीसत्यवक्ताजितेंद्रियः
॥ कथासमाप्तौभुंजीतपत्रावल्यांयतात्मवान् ॥ ४४ ॥ वृंताकंचकलिंदंचतैलंचद्विदलंमधु ॥ दग्धमन्नंपर्य्युषितंभावदुष्टंत्यजेद्व्रती ॥ ४५ ॥ आमिषंच
मसूरान्नमुदक्याहृष्टमेवच ॥ रसोनंमूलकंहिंगुंपलांडुंगृंजनंतथा ॥ ४६ ॥ कूष्मांडंनालिकाशाकंनभुंजीतकथाव्रती ॥ कामंक्रोधंमदंलोभंदंभंमानंचवर्ज्जये
त् ॥ ४७ ॥ विप्रध्रुक्पतितव्रात्यश्वपाकयवनांत्यजैः ॥ उदक्ययावेदबाह्यैर्नवदेद्यःकथाव्रती ॥ ४८ ॥ वेदगोगुरुविप्राणांस्त्रीराजमहतांतथा ॥ देवानां
देवभक्तानांनानिंदांशृणुयादपि ॥ ४९ ॥ विनयंचार्ज्जवंशौचंदयांचमितभाषणम् ॥ उदारंमानसंचैवकुर्य्याद्यस्तुकथाव्रती ॥ ५० ॥ श्वित्रीकुष्ठीक्षयीरु
ग्णोभाग्यहीनश्चपापकृत् ॥ दरिद्रश्चानपत्यश्चभक्त्येमांशृणुयात्कथाम् ॥ ५१ ॥ वंध्यावाकाकवंध्यावादुर्भगावामृतार्भका ॥ पतद्गर्भागनायातुश्रोतव्येयं
तयाकथा ॥ ५२ ॥ धर्म्मार्थकाममोक्षांश्चयोवांछतिविनाश्रमम् ॥ भगवत्याभागवतंश्रोतव्यंतेनयत्नतः ॥ ५३ ॥ कथादिनानिचैतानिनवयज्ञैःसमानि
हि ॥ तेषुदत्तंहुतंजप्तमनन्तफलदंभवेत् ॥ ५४ ॥ एवंव्रतंनवाहंतुकृत्वोद्यापनमाचरेत् ॥ महाष्टमीव्रतेयद्वत्तथाकार्य्यंफलेप्सुभिः ॥ ५५ ॥ निष्कामाःश्रवणे
नैवपूतामुक्तिंव्रजन्तिहि ॥ भोगमोक्षप्रदानॄणांयतोभगवतीपरा ॥ ५६ ॥ पुस्तकस्यचवक्तुश्चपूजाकार्य्यातुनित्यशः ॥ वक्त्रादत्तंप्रसादंतुगृह्णीयाद्भक्तिपूर्वक
म् ॥ ५७ ॥ कुमारीःपूजयेन्नित्यंभोजयेत्प्रार्थयेच्चयः ॥ सुवासिनीश्चविप्रांश्चतस्यसिद्धिर्नसंशयः ॥ ५८ ॥ गायत्र्यानामसाहस्रंसमाप्तावथवापठेत् ॥
विष्णोर्नामसहस्रंचसर्वदोषोपशान्तये ॥ ५९ ॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु ॥ न्यूनंसम्पूर्णतांयातितस्माद्विष्णुंचकीर्त्तयेत् ॥ ६० ॥
देव्याससप्तशतीमंत्रैःसमाप्तौहोममाचरेत् ॥ देवीमाहात्म्यमूलेननवार्णमनुनाथवा ॥ ६१ ॥ गायत्र्यात्वथवाहोमःपायसेनससर्पिषा ॥ यतोभागवतंत्वेतद्गा
यत्रीमप्सीरितम् ॥ ६२ ॥ [illegible] धनादाभैः ॥ प्रसन्नवाचकेसर्वाःप्रसन्नास्तस्यदेवताः ॥ ६३ ॥ ब्राह्मणान्भोजयेद्भक्त्यादाक्षिणा

म् ॥ ६४ ॥ सुवासिनीः कुमारीश्चदेवीभक्त्याचभोजयेत् ॥ ताभ्योपिदक्षिणांदत्त्वाप्रार्थये
भिश्चतोषयेत ॥ पृथिव्यां... ॥ ... नानिचान्यानिसुवर्णगाःपयस्विनीः ॥ हयानिभान्मेदिनींचतस्यस्यादक्षयंफलम् ॥ ६६ ॥ देवीभागवतंचैतल्लिखितंशो
त्सिद्धिमात्मनः ॥ ६५ ॥ दद्याद्दानानिचान्यानिसुवर्णगाःपयस्विनीः ॥ हयानिभान्मेदिनींचतस्यस्यादक्षयंफलम् ॥ ६६ ॥ देवीभागवतंचैतल्लिखितंशो
त्सिद्धिमात्मनः ॥ ६५ ॥ दद्याद्दानानिचान्यानिसुवर्णगाःपयस्विनीः ॥ अष्टम्यांवानवम्यांचवाचकायार्चितायच ॥ दद्यात्सभोगान्भुक्त्वेहदुर्लभंमोक्षमाप्नुयात् ॥६८॥
भनाक्षरम् ॥ हेमसिंहासनेस्थाप्यपट्टवस्त्रेणवेष्टितम् ॥ ६७ ॥ अष्टम्यांवानवम्यांचवाचकायार्चितायच ॥ दद्यात्सभोगान्भुक्त्वेहदुर्लभंमोक्षमाप्नुयात् ॥६८॥
दारिद्रोदुर्बलोवालस्तरुणोजरठोपिवा ॥ पुराणवेत्तावंद्यःस्यात्पूज्योमान्यश्चसर्वदा ॥ ६९ ॥ सन्तिलोकस्यबहवोगुरवोगुणजन्मतः ॥ सर्वेषामपितेषांच
पुराणज्ञःपरोगुरुः ॥ ७० ॥ पौराणिकोब्राह्मणस्तुव्यासासनसमाश्रितः ॥ असमाप्तेप्रसंगेतुनमस्कुर्य्यान्नकस्यचित् ॥ ७१ ॥ पौराणिकींकथां
दिव्यांयेपिशृण्वंत्यभक्तितः ॥ तेषांपुण्यफलंनास्तिदुःखदारिद्र्यभागिनाम् ॥ ७२ ॥ असंपूज्यपुराणंतुताम्बूलकुसुमादिभिः ॥ येशृण्वंतिकथांदेव्यास्तेदरि
द्राभवंतिहि ॥ ७३ ॥ कीर्त्यमानांकथांत्यक्त्वायेव्रजंत्यन्यतोनराः ॥ भोगान्तरेप्रणश्यंतितेषांदाराश्चसम्पदः ॥ ७४ ॥ येचतुंगासनारूढाःकथांशृण्वंति
दांभिकाः ॥ तेवायसाभवंत्यत्रभुक्त्वानिरययातनाः ॥ ७५ ॥ येचाढ्यासनसंस्थाश्चयेवीरासनसंस्थिताः ॥ शृण्वंतिचकथांदिव्यांतेस्युरर्ज्जुनशाखिनः ॥७६॥
कथायांकीर्त्यमानायांयेवदंतिदुरुत्तरम् ॥ रासभास्तेभवंतीहकृकलासास्ततःपरम् ॥ ७७ ॥ निंदंतियेपुराणज्ञान्कथांवापापहारिणीम् ॥ तेतुजन्मशतंदुष्टा
शुनकाःस्युर्नसंशयः ॥ ७८ ॥ येशृण्वंतिकथांवक्तुःसमानासनसंस्थिताः ॥ गुरुतल्पसमंपापंप्राप्यंतेनरकालयाः ॥ ७९ ॥ येचाप्रणम्यशृण्वंतितेभवंतिविष
द्रुमाः ॥ शयानायेपिशृण्वंतिभवंत्यजगराहयः ॥८०॥ येकदाचनपौराणींनशृण्वंतिकथांनराः ॥ तेघोरंनरकंभुक्त्वाभवन्तिवनशूकराः ॥ ८१ ॥ येकथांनानु
मोदंतेविघ्नंकुर्वन्तियेशठाः ॥ कोट्यब्दंनिरयंभुक्त्वाभवन्तिग्रामशूकराः ॥८२॥ आसनंभाजनंद्रव्यंफलंवस्त्राणिकम्बलम् ॥ पुराणज्ञाययच्छन्तितेव्रजन्तिहरेः
पदम् ॥ ८३ ॥ पुराणपुस्तकस्यापियेपट्टवसनंनवम् ॥ प्रयच्छन्तिशुभंसूत्रंतेनरास्सुखभागिनः ॥ ८४ ॥ पुराणानांतुसर्वेषांश्रवणाद्यत्फलंलभेत् ॥ तस्मा
च्छतगुणंपुण्यंदेवीभागवताल्लभेत् ॥ ८५ ॥ यथासरित्सुप्रवरागंगादेवेषुशंकरः ॥ काव्येरामायणंयद्वज्ज्योतिष्मत्सुयथारविः ॥ ८६ ॥ आह्लादकानां
चन्द्रश्चधनानांचयथायशः ॥ क्षमावतांयथाभूमिर्गांभीर्य्येसागरोयथा ॥ ८७ ॥ मंत्राणांचैवसावित्रीपापनाशेहरिस्मृतिः ॥ अष्टादशपुराणानांदेवीभागवतंत
था ॥ ८८ ॥ येनकेनाप्युपायेननवकृत्वःशृणोतिचेत् ॥ नशक्यंतत्फलंवक्तुंजीवन्मुक्तस्सएवहि ॥ ८९ ॥ राजशत्रुभयेप्राप्तेमहामारीभयेतथा ॥ दुर्भिक्षेराष्ट्र
भंगेचतच्छांत्यैशृणुयादिदम् ॥ ९० ॥ भूतप्रेतविनाशायराज्यलाभायशत्रुतः ॥ पुत्रलाभायशृणुयाद्देवीभागवतंद्विजाः ॥ ९१ ॥ श्रीमद्भागवतंयस्तुपरं
शृणुयादपि ॥ श्लोकार्द्धंश्लोकपादंवासयातिपरमांगतिम् ॥ ९२ ॥ भगवत्यास्वयंदेव्याःश्लोकार्द्धेनप्रकाशितम् ॥ शिष्यप्रशिष्यद्वारेणतद्देवविपुलीकृतं

॥ १३ ॥ नगायत्र्याःपरोधर्म्मोनगायत्र्याःपरन्तपः ॥ नगायत्र्यासमोदेवोनगायत्र्याःपरोमनुः॥ १४ ॥ गातारंत्रायतेयस्माद्गायत्रीतेनसोच्यते ॥ सात्रभा
वगतेदेवीसरहस्याप्रतिष्ठिता ॥ १५ ॥ अतोभागवतस्यास्यदेव्याःप्रीतिकरस्यच ॥ महांत्यपिपुराणानिकलांनार्हन्तिषोडशीम् ॥ १६ ॥ श्रीमद्भागवतं
पुराणममलंयद्ब्राह्मणानांधनंधर्म्मोधर्म्मसुतेनयत्रगदितोनारायणेनामलः॥ गायत्र्याश्चरहस्यमत्रचमणिद्वीपश्चसंवर्णितःश्रीदेव्याहिमभूभृतेभगवतीगीताचर्गा
तास्वयम्॥१७॥तस्मान्नास्यपुराणस्यलोकेन्यत्सदृशम्परम् ॥अतस्सदैवसंसेव्यंदेवीभागवतंद्विजाः ॥ ९८ ॥ यस्याःप्रभावमखिलंनहिवेदधातानोवाहरिर्नगि
रिशोनहिचाप्यनन्तः ॥ अंशांशकाअपिचतेकिमुतान्यदेवास्तस्यैनमोस्तुसततंजगदम्बिकायै ॥ ९९ ॥ यत्पादपंकजरजस्समवाप्यविश्वंब्रह्मासृजत्यनुदिनं
चबिभर्तिविष्णुः ॥ रुद्रश्चसंहरतिनेतरथासमर्थास्तस्यैनमोस्तुसततंजगदम्बिकायै ॥१००॥ सुधाकूपारान्तस्त्रिदशतरुवाटीविलसितेमणिद्वीपेचिन्तामणिमय
गृहेचित्ररुचिरे ॥ विराजन्तीमम्बांपराशिवहृदादिस्मेरवदनांनरोध्यात्वाभोगंभजतिखलुमोक्षंचलभते ॥ १०१ ॥ ब्रह्मेशाच्युतशक्राद्यैर्म्महर्षिभिरुपासिता ॥
जगतांश्रेयसेसास्तुमणिद्वीपाधिदेवता ॥ १०२ ॥ ॥॥ इतिश्रीस्कन्दपुराणेमानसखण्डेदेवीभागवतमाहात्म्ये श्रवणविधिवर्णनंनामपञ्चमोऽध्यायः ॥ ॥
॥ ५ ॥ समाप्तमिदंस्कान्दीयंमाहात्म्यम् वेदांगाग्निकुशैलशैलशिखिनांमूलेतुसंवत्सरेराधेमासिचमेचकेहरितिथौसतार्चिषोवासरे ॥ माहात्म्यंजगदम्बिकां
घ्रियुगलंनत्वाम्बिकाप्रीतयेपूर्तीरामपदेननीतममलंस्कान्दीयमेतच्छुभम् ॥ १ ॥ गोमतीसौम्यपुलिनेग्रामेखानीपुरोऽङ्कितम् ॥ श्रीभागवतमाहात्म्यंनगव्यो
मेभभूशके ॥ २ ॥ श्रीभगवतीमणिद्वीपाधिदेवताजगदम्बिकाविजयते ॥ शुभमस्तु ॥ (१९४२) इयं मूलात्मिका संख्या ।

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मज खेमराजेन स्वकीये
“श्रीवेंङ्कटेश्वर” द्रणालये मुद्रितम्. संवत् १९५१.

॥ इति श्रीमद्देवीभागवत माहात्म्यं समाप्तम् ॥

॥ इति माहात्म्यसहितं श्रीमद्देवीभागवतं संपूर्णम् ॥